अवारणीयं। अवारितव्यं। वारणायोग्यं। यथा,—
"नमस्ते नित्यविलसद्वैष्णवरूनिकेतन।
अवार्य्यवीर्य्यवद्रूपं विष्णोर्यत् प्रणमाम्यहं" ॥
इत्युत्कलखण्डे २७ अध्यायः ॥

अवासाः, [स्] त्रि, (नास्ति वासो यस्य।) वस्त्ररहितः। नग्नः। इत्यमरः ॥

अवास्तवं, त्रि, अयथार्थं। मिथ्या। न वास्तवं अवास्तवमिति नञ्समासनिष्पन्नं ॥

अवाह्यः, त्रि, परिरक्षकः। अवपूर्व्वकाद्वाधातोरल् प्रत्ययेन निष्पन्नः ॥

अविः, पुं, (अव + इन्।) सूर्य्यः। पर्व्वतः। मेषः। इत्यमरः ॥ [इति मनुः।) ("श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणां"।
"मूत्राणि हस्तिकरभमहिषीखरवाजिनां।
गोजावीनां स्त्रियां पुंसां मूत्रवर्ग उदाहृतः" ॥
इति वैद्यकरसेन्द्रसारसंग्रहे ॥)
नाथः। मूषिककम्बलः। इति मेदिनी ॥ प्राचीरं वायुः। इति दण्डी ॥

अविः, स्त्री, ऋतुमती। इत्यमरः ॥

अविकटः, पुं, (अवीनां मेषाणाम् संघातः। अवि + कटच्।) मेषसमूहः। इति संक्षिप्तसारपरिशिष्टं ॥ भेड़ारपाल इति भाषा।

अविकटः, त्रि, अविशालः। अकरालः। अविस्तारः। न विकटः अविकटः इति नञ्समासनिष्पन्नः ॥

अविकं, क्ली, (अवि + क।) हीरकं। इति राजनिर्घण्टः ॥ (हीरकशब्देऽस्य गुणादयो ज्ञातव्याः ॥

अविकारी, [न्] त्रि, (न विकारी + नञ्तत्पुरुषः।) विकाराजनकः। यथा वृहस्पतिः।
"कन्दमूलफलैः पुष्पैः शस्तैः शुक्तरसन्तु यत्।
अविकारि भवेन्मेध्यमभक्ष्यं तद्विकारकृत्" ॥
इत्याह्निकाचारतत्त्वं ॥

अविगन्धिका, स्त्री, (अवेश्छागस्य गन्द इव गन्धोऽस्याः। ततः स्वार्थे कन्।) अजगन्धावृक्षः। इति राजनिर्घण्टः ॥

अविगीतं, त्रि, (न विगीतम्। नञ्तत्पुरुषः।) अनिन्दितं। यथा। "नापि मङ्गलं सफलमविगीतशिष्टाचारविषयत्वाद्दर्शवत्"। इति मङ्गलवादचिन्तामणिः ॥

अविघ्नः, पुं, (न विघ्नः। नञ्तत्पुरुषः।) करमर्दकवृक्षः। इत्यमरः ॥ पानिआमला इति ख्यातः। इति सारसुन्दरी ॥

अविचारः, पुं, (नास्ति विचारो यस्येति।) अन्यायः। अत्याचारः। विचाररहिते त्रि। (विचाराभावः।) यथा,—
"अविचारेण सर्व्वाभिरनुष्ठेयन्तु तत् पुनः।
संसारोत्तारणायालमेतद्वेदविदो विदुः" ॥
इति मत्स्यपुराणं ॥

अविचारितः, त्रि, (न विचारितः। नञ्तत्पुरुषः।) अकृतविचारः। अविवेचितः। अविचारशब्दादितप्रत्ययेन निष्पन्नः ॥ ("अतः सर्व्वथाऽविचारितं कर्म्म न कर्त्तव्यम्"। इति पञ्चतन्त्रम्। अविवेचितं सम्यग्विवेचनं विना। यथा,—
"स किं भृत्यः स किं मन्त्री य आदावेव भूपतिम्।
युद्धोद्योगं स्वभूत्यागं निर्दिशत्यविचारितम्" ॥
इति हितोपदेशः।)

अविच्छिन्नं, क्ली, (न विच्छिन्नं, नञ्तत्।) विच्छेदाभाववत्। अनिष्पत्तिमत्। यथा,—
"अविच्छिन्ने कथम्भावे यत् प्रधानस्य पठ्यते।
अविज्ञातफलं कर्म्म तस्य प्रकरणाकृता" ॥
इति मलमासतत्त्वम् ॥

अविज्ञः, त्रि, (न विज्ञः। नञ्तत्पुरुषः।) अप्रवीणः। अनिपुणः। अनभिज्ञः। अशिक्षितः। अकृती। यथा,—
एते सर्व्वे गुणाः कान्त सन्ति कान्ते त्वयि ध्रुवं।
त्वां न वाञ्छन्ति याः कान्तास्ता अविज्ञाश्च वञ्चिताः"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २३ अध्यायः ॥

अविज्ञेयं, त्रि, (न विज्ञेयं। नञ्तत्पुरुषः।) दुर्ज्ञेयं। यथा,—
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणं।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः" ॥
इति मानवे १ अध्यायः ॥

अविडीनं, क्ली, (न विडीनम्। नञ्तत्पुरुषः।) पक्षिणां आभिमुख्याभिगमनं। इति महाभारतं ॥

अवितं, त्रि, (अव + क्त।) त्रातं। रक्षितं। इत्यमरः ॥

अवितथं, क्ली, (न वितथम्। नञ्तत्पुरुषः।) सत्यं। ("अवितथमाह प्रियंवदा"। इति शाकुन्तले।) तद्विशिष्टे त्रि। इति रत्नावली ॥ (सार्थकं। यथा,—"वत्स ! अवितथैषा तव भारती भवतु"। इति नागानन्दे।)

अवित्यजः, पुं, क्ली, (न विशेषेण त्यज्यते रसायनादिषु इति। न + वि + त्यज + क।) पारदः। इति राजनिर्घण्टः ॥

अविदूसं, क्ली, (अवेर्मेषस्य दुग्धम्। अवेः दुग्धे सोढ़दूसमरीसचः, इति दूसप्रत्ययः।) मेषदुग्धं। इति हेमचन्द्रः ॥ (मेषदुग्धविवरणेऽस्य विशेषो ज्ञेयः ॥)

अविद्धकर्णा, स्त्री, अम्बष्ठा। आकनादि इति ख्याता। इति भृङ्गराजः। इत्यमरटीकायां भरतः ॥

अविद्धकर्णी, स्त्री, (न विद्धः पर्णरूपः कर्णो यस्याः।) विद्धकर्णीलता। इति भरतः ॥ (माचिकाशब्देऽम्बष्ठकीशब्दे चास्या गुणादयो ज्ञातव्याः ॥)

अविद्यः, त्रि, (नास्ति विद्या यस्य सः।) विद्यारहितः। अविद्वान्। विद्याहीनः। यथा,—
"अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः"।
अपि च। कात्यायनः।
"नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित्" ॥
इति दायतत्त्वं ॥ अन्यच्च।
"अविद्यानान्तु सर्व्वेषामीहातश्चेद्धनं भवेत्।
समस्तत्र विभागः स्यादपित्र्य इति धारणा" ॥
इति मानवे ९ अध्याये २०५ श्लोकः ॥

अविद्यमानः, त्रि, (न विद्यमानः। नञ्तत्पुरुषः।) अवर्त्तमानः। सत्तारहितः। अभावः। यथा नारदः,—
"अविद्यमाने पित्रर्थे स्वांशादुद्धृत्य वा पुनः।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः" ॥
इति दायतत्त्वं ॥

अविद्या, स्त्री, (न विद्या। नञ्तत्पुरुषः।) अज्ञानं। इत्यमरः ॥ माया। इति वेदान्ते ॥ (अहङ्कारहेतुकमज्ञानं, मिथ्याज्ञानं, विद्याविरोधिनी, अयथार्थबुद्धिः। यदुक्तम्,—
"अविद्याया अविद्यात्वमिदमेव तु लक्षणम्।
यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु सा भवेत्" ॥
अन्यच्च,
"सेयं भ्रान्तिर्निरालम्बा सर्व्वन्यायविरोधिनी।
सहते न विचारं सा तमो यद्वद्दिवाकरम्"।
अव्यक्तमहदहङ्कारपञ्चतन्मात्रेष्वनात्मस्वात्मबुद्धिः। यथा,—"शरीरे मनुष्योऽहमित्यादि"। इयञ्च सर्व्वक्लेशमूलभूता तम इत्युच्यते।
"अविरोधितया कर्म्म नाऽविद्यां विनिवर्त्तयेत्।
विद्याविद्यां निहन्त्येव तेजस्तिमिरसंघवत्" ॥
इति आत्मबोधः।)

अविधिः, पुं, (न विधिः। नञ्तत्पुरुषः।) अविधानं। शास्त्राविहितं। यथा,—
"येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकं" ॥
इति श्रीभगवद्गीतायां ९ अध्याये २३ श्लोकः ॥
अपि च याज्ञवल्क्यः।
"वसेत् स नरके घोरे दिनानि पशुरोमभिः।
अमितानि दुराचारो यो हन्त्यविधिना पशून्" ॥
इत्याह्निकतत्त्वं ॥

अविनः, पुं, (अव + इनच्।) यष्टा। यागकर्त्ता। इत्युणादिकोषः ॥

अविनयः, पुं, (न विनयः। नञ्तत्पुरुषः।) विनयाभावः। यथा,—
"बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः।
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे ॥
वेणो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः।
सुदासो यवनश्चैव सुमुखो निमिरेव च" ॥
इति मानवे ७ अध्याये ४०।४१ श्लोकौ ॥ (अशिष्टाचारः। यथा,—
"अयमाचारत्यविनयं मुग्धासु तपस्विकन्यकासु"।
इति शाकुन्तले।) अविनीते त्रि ॥

अविनाभावः, पुं, (विना व्यापकं विना न भावः स्थितिः।) व्याप्तिः। व्याप्यनिष्ठव्यापकनिरूपितधर्म्मः। यथा,—"वह्निमान् धूमात्" इत्यादौ धूमनिष्ठा वह्निनिरूपिता व्याप्तिः ॥ इति न्यायमीमांसयोर्मतं ॥ तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावः। यथा। केयमाकाङ्क्षा न तावदविनाभावः। नीलं सरोजमित्यादौ तदभावात्। विमलं जलं नद्याः कच्छे महिष इत्यत्र अनान्वितनद्या अविनाभावात् कच्छे साकाङ्क्षतापत्तेश्च। इत्याकाङ्क्षाचिन्तामणिः। अविनाभाव इति। तत्पदार्थेन विना यो भावः सत्त्व तदभाव इत्यर्थः। तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावस्तत्पदार्थे तत्पदार्थाकाङ्क्षा इति भावः। इति तट्टीका माथुरी ॥